SAPTHAGIRI (SANSKRIT)
SPIRITUAL ILLUSTRATED MONTHLY
Volume:10, Issue: 02
May-2023, Price Rs.20/-
No. of pages-24

तिरुमलतिरुपतिदेवस्थानानि

# सप्तगिरिः

आध्यात्मिकसचित्रमासपत्रिका

मे - २०२३



## तिरुपति
## श्रीगोविन्दराजस्वामिनः ब्रह्मोत्सवः
26.05.2023 - 03.06.2023

**तिरुमल श्रीवेङ्कटेश्वरस्वामिनः 03-04-2023 तः 05-04-2023 पर्यन्तम् आयोजित वसन्तोत्सव दृश्यमालिका। अस्मिन् कार्यक्रमे ति.ति.दे., कार्यनिर्वहणाधिकारी श्री ए.वि.धर्मारेड्डि, ऐ.डि.ई.एस्., दम्पत्यौ भक्ताः च भागं गृहीतवन्तः।**



# गीतामृतम्



अर्जुन उवाच -
न चैतद्विद्मः कतरन्नो गरीयो
यद्वा जयेम यदि वा नो जयेयुः।
यानेव हत्वा जिजीविषामः
तेऽवस्थिताः प्रमुखे धार्तराष्ट्राः।।
(भगवद्गीता २-६)

**भावः** - किं भिक्षाटनं श्रेष्ठं वा उत युद्धं वा? एतत् वयं न जानीमः। एतत् वयं न जानीमः यत् दुर्योधनादयः अस्मान् जेष्यन्ति वा अथवा वयमेव जेष्यामः इति। युद्धे यान् धार्तराष्ट्रान् दुर्योधनादीन् मारयित्वा वयं जेतुम् इच्छामः ते धार्तराष्ट्राः अस्माकं पुरतः एव तिष्ठन्ति।

# सङ्कीर्तनम्



अञ्जलिरञ्जलिरयं ते
किं जनयसि मे खेदं वचनैः ।।अञ्जलि।।

मां किं भजसे मया किं ते
त्वं को वा मे तव काहं
किं कार्यमितो गेहं मम ते
शङ्कां विना किं समागतोसि ।।अञ्जलि।।

ननु विनयोक्तेर्न योग्याहं
पुनः पुनस्त्वं पूज्योऽसि
दिनदिनकलहनिधिना ते किं
मनसिजजनक रमामरण ।।अञ्जलि।।

दैवं बलवत्तरं भुवने
नैव रोचते सम्यक् मया
एवमेव भवदिष्टं कुरु कुरु
श्री वेङ्कटाद्रिश्रीनिवास ।।अञ्जलि।।

(अन्नमाचार्यसङ्कीर्तनम्)

सम्पादकीयम्

# नरसिंहजयन्ती

हिन्दुत्सवः वैशाखामासस्य चतुर्दशदिने नरसिंहजयन्ती आचर्यते। हिन्दुजनाः एतत् तस्मिन् दिने मन्यन्ते यस्मिन् दिने विष्णुदेवः नरसिंह इति नाम्ना प्रसिद्धस्य ''पुरुषसिंहस्य'' रूपेण चतुर्थम् अवतारं धारयति स्म, यत् सः दमनकारिणम् असुरराजं हिरण्यकशिपुं जित्वा स्वभक्तस्य प्रह्लादस्य रक्षणं करोति स्म। नरसिंहस्य आख्यायिका अज्ञानस्य उपरि ज्ञानस्य विजयस्य, ईश्वरेण स्वभक्तानाम् अर्पितस्य रक्षणस्य च प्रतिनिधित्वं करोति। नरसिंहजयन्ती मुख्यतया दक्षिणभारतीयराज्येषु कर्नाटक-आन्ध्रप्रदेशेषु, उत्तरतमिलनाडुषु च विष्णु-अनुयायिभिः वैष्णवैः आचर्यते, यत्र नरसिंहस्य पूजनं लोकप्रियम् अस्ति। पूर्वोक्तप्रदेशेषु नरसिंह,लक्ष्मीनरसिंहमन्दिरेषु विभिन्नेषु कालखण्डेषु देवतायाः सम्मानार्थं विशेषपूजाः भवन्ति। भक्ताः गृहे प्रातःकाले षोडशोपचारपूजा, सायंकाले पञ्चोपचारपूजा च कुर्वन्ति।

श्रीवैष्णवपरम्परायाः सदस्याः परम्परागतरूपेण सायंपर्यन्तम् उपवासं कुर्वन्ति, प्रार्थनायाः अनन्तरं भोजनस्य सेवनं च कुर्वन्ति। गुडजलात् पानकं नाम पेयं कृत्वा उत्सवे ब्राह्मणेभ्यः वितरन्ति।

कर्नाटकदेशे अस्य उत्सवस्य कृते कतिपयैः मन्दिरैः सामुदायिकभोजनस्य आयोजनं भवति।

प्रतिवर्षं नरसिंहजयन्ती दिने तमिलनाडुदेशस्य मेलाट्टूर्-ग्रामे भागवतमेला इति नाम्ना प्रसिद्धं पारम्परिकं लोकनृत्यं सार्वजनिकरूपेण प्रदर्श्यते। ''भागवत'' इति पदं वैष्णवपरम्परायां प्रमुखं हिन्दु ग्रन्थं भागवतपुराणं निर्दिशति, ''मेला'' इति पदं पारम्परिकनर्तकान् वा गायकान् वा निर्दिशति। एवं च इदं लोकनृत्यं विशिष्टनृत्यविधिना कर्नाटकसङ्गीतशैल्याः च उपयोगेन भागवतपुराणात् कथाः अभिनयति। एकं विशेषं प्रदर्शनं ''नाट्यप्रभावस्य संस्कारमहत्त्वस्य च कृते उल्लेखनीयम्'' अस्ति प्रह्लादस्य नरसिंहस्य च कथा।

।।लोकास्समस्तास्सुखिनो भवन्तु।।

तिरुमल-तिरुपतिदेवस्थानानां सचित्रमासपत्रिका
आध्यत्मिकसचित्रमासपत्रिका

# मे २०२३

सम्पुटिः-१० सञ्चिका-०२

श्रीशोभकृत्संवत्सरस्य वैशाखशुक्लएकादशी तः
श्रीशोभकृत्संवत्सरस्य ज्येष्ठशुक्लैकादशी पर्यन्तम् - १९४४

*वेङ्कटाद्रिसमं स्थानं
ब्रह्माण्डे नास्ति किञ्चन ।
वेङ्कटेशसमो देवो
न भूतो न भविष्यति ॥*




| | |
|---|---|
| अजातशत्रुः कः? | 06 |
| - डा.के.वरप्रसादः | |
| वेङ्कटाचलमाहात्म्यम् | 08 |
| - डा. सि.शिवारेड्डि | |
| आद्यकृषकः पृथुवैन्यः | 10 |
| - श्री विष्णु शर्मा | |
| श्रीशेषाद्रीशस्तुतिः | 15 |
| - श्री कन्दाल लक्ष्मीनारायणः | |
| महाभारतान्तर्गत - यवक्रीतोपाख्यानम् | 17 |
| - डा.बी.कामाक्षम्मा | |
| कूर्मावतारः (चित्रकथा) | 19 |
| - का.भास्करः | |
| बालविनोदिनी | 21 |


**मुखचित्रम् –** श्रीगोविन्दराजस्वामिनः ब्रह्मोत्सवः, तिरुपतिः।
**अन्तिमरक्षापुटः –** श्रीपद्मावतीदेव्याः प्लवोत्सवः, तिरुचानूरुः।

गौरवसम्पादकः:-
श्री ए.वी.धर्मारेड्डि I.D.E.S.,
कार्यनिर्वहणाधिकारी (F.A.C.), ति.ति.देवस्थानानि

प्रकाशकः - प्रधानसम्पादकः:
डा॥ के.राधारमणः, M.A., M.Phil., Ph.D.,

सम्पादकः - डा॥ वि.जि.चोक्कलिङ्गम्, M.A., Ph.D.,

मुद्रापकः - श्री पि.रामराजु, M.A.,
प्रत्येकाधिकारी,
ति.ति.दे.मुद्रणालयः,
तिरुपतिः।

छायाचित्रग्रहणम् - श्री पि.एन्.शेखरः, छायाचित्रग्राहकः,
ति.ति.दे.
श्री बि.वेङ्कटरमणः, सहायक-छायाचित्रग्राहकः, ति.ति.दे.

सूचना
मुद्रितलेखानां विचाराः लेखकानामेव।
एतद्विषये अस्माकं दायित्वं नास्ति।
*– प्रधानसम्पादकः*

## सङ्केतः

प्रधानसम्पादकः,
सप्तगिरिः, ति.ति.देवस्थानानि
तिरुपतिः - ५१७ ५०७.
दूरभाषा - ०८७७ - २२६४५४३, २२६४३५९,
२२६४३६०
सूचनानाम्, आक्षेपाणां च कृते
सम्पर्कं कुर्वन्तु -
sapthagiri.helpdesk@tirumala.org

एका पत्रिका : रू.२०/-
वार्षिकग्राहकत्वम् रू.२४०/-
आजीविक ग्राहकत्वम् रू.२४००/-



# अजातशत्रुः कः?

गुरुसहस्रावधानी डा. कडिमिल्लि वरप्रसादः , चरवाणी - ९२४७८७९६०६

लोके धर्मराजः अजातशत्रुः इति प्रसिद्धः अस्ति। किन्तु दुर्योधनादयः शत्रवः अनेके सन्ति खलु तस्य। तदा सः अजातशत्रुः कथं भवति? न विद्यन्ते अन्तश्शत्रवः यस्य सः अजातशत्रुः इति वक्तव्यम्। नतु बहिश्शत्रवः इति। अन्तश्शत्रवः षड् वर्तन्ते। ''कामः क्रोधश्च लोभश्च मोहश्च मदमत्सरौ'' एते षड् अन्तश्शत्रवः ''.... देहे तिष्ठन्ति तस्कराः ज्ञानरत्नापहाराय तस्मात् जागृत जागृत इति'' इति शङ्कर भगवत्पादाः तेषां शत्रूणां अग्रेसरः कामः महर्षिभिः प्रोक्तानि व्यसनानि सप्त सन्ति। तेषामपि अग्रेसरः काम एव। अत एव 'जहि शत्रुं महाबाहो! कामरूपं दुरासदम्' इत्युक्तवान् गीताचार्यः।

स्त्रीणां पुरुषेषु वा पुरुषाणां स्त्रीषु वा या धर्मप्रयुक्ता वाञ्छा प्रवर्तते सः पुरुषार्थरूप कामः। परेषु या अधर्मरूपा वाञ्छा प्रवर्तते सः शत्रुरूप कामो व्यसनरूप कामश्च। सः दुर्बलो भवति यस्य कामो बलवान्। रावणासुरो महातपस्वी, शिवभक्तधुरन्धरो, महापराक्रमशाली, लङ्कासाम्राज्याधिपतिरपि केवलं कामेनैव निहतः। सिंहबलः कीचकः अपि अतिमात्रेण कामेन पीडितः प्राणान् त्यक्तवान्। परपुरुषवाञ्छावती शूर्पणखा रामरावणसङ्ग्रामस्य मूलरूपिणी सञ्जाता।

कामात् सञ्जायते क्रोधः क्रोधरूप शत्रुणा निहतः हिरण्यकशिपुः। मारीचार्तनादाकर्णनसमये कातरतां प्राप्नुवती सीता लक्ष्मण विषये अतिमात्रक्रोधं प्रदर्शितवती। ''इच्छसि त्वं विनश्यन्तं रामं लक्ष्मण मत्कृते' इति अतिदारुणं दूषितवती। केवलं तत् क्रोधकारणेन लक्ष्मणः दुरंगतः। सीता रावणेन अपहृता अभूत्।

''जितक्रोधः कः?'' इति पृष्टवान् वाल्मीकिमहर्षिः देवर्षिं नारदम्। ''रामः' इत्युक्तवान् नारदः। 'कस्य बिभ्यति

देवाश्च जातरोषस्य संयुगे? इत्यन्यः प्रश्नः। तस्यापि च प्रश्नस्य रामः इत्येव प्रत्युत्तरं दत्तवान् नारदः। अर्थात् रामः निष्क्रोधः इति न। क्रोधं जितवान्। रामेण जितः क्रोधः। नतु क्रोधेण जितो रामः। तस्मादेव सीतान्वेषण विषये विलंबनं कृतवन्तं सुग्रीवं लक्ष्मणेन 'न च सङ्कुचितः पन्धाः येन वाली गतो हतः' इति सन्देशं प्रेषितवान् रामः। जितक्रोधस्यैव तादृशं गाम्भीर्यं जायते। सुग्रीवः मित्रम्। तस्य विषये क्रोधो न युक्तः। रावणः शतृः। तस्मादेव तस्य विषये क्रोधमानीय ब्रह्मास्त्रेण ममार दशग्रीवम्। अतः निष्क्रोधी न जयति। अतिक्रोधी च न जयति। जितक्रोध एव जेता भवति।

परवस्तु कांक्षा लोभः। रामसम्बन्धिसाम्राज्यं स्वीयपुत्राय प्रदातुं वाञ्छितवती कैकेयी भर्तृविहीना अभूत्। स्वीयपुत्रदूषिता च बभूव। लोकनिन्दाञ्च प्राप। पाण्डवसम्बन्धि राज्यं केवल लोभेन स्वीचकार सुयोधनः मायादुरोदरक्रीडया। किं प्रयोजनं प्राप्तम्? सानुजः, सबन्धुः, समित्रः, सगुरुः निपपात रणस्थले धार्तराष्ट्राग्रजः।

मोहो नाम अज्ञानम् शुक्तौ रजतभ्रान्तिः सर्पे रज्जुभ्रन्तीः रज्जौ सर्पभ्रान्तिर्वा

**क्रोधाद्भवति समोहस्समोहात्स्मृतिविभ्रमः।**
**स्मृतिभ्रंशाद्बुद्धिनाषो बुद्धिनाशात्प्रणश्यति॥२-६३॥**

इति गीताचार्यः। अतो मोहो विनाशकारकः इति ज्ञायते। लोके स्वर्णमृगो न विद्यते। किन्तु पुरतो दृश्यते। मोहं गतवती सीता। तस्मिन्नेव क्षणे रामो दूरंगतः। किञ्चित् कालानन्तरं लक्ष्मणश्च दुरंगतः। रावणः अपहतवान् भूजाताम्। ब्रह्मसत्यम्। जगन्मिथ्या। यद्दृश्यम् तन्नश्यम्। तथापि दृश्यमान जगति सत्यभावनां प्राप्य नरो गच्छति दूरं मुक्तिमार्गात्।

मदो नाम गर्वः अहङ्कारः अदृश्यमान विषो मदः। सहस्रभुजाहङ्कारेण, भुजबलमदेन, सार्वभौमत्व मदेनैव केवलं परशुराम पितरं मारितवान् कार्तवीर्यार्जुनः। तेनैव हि कारणेन परशुरामेण निहतः। न केवलं कार्तवीर्यार्जुनः क्षत्रियलोक एव बहुधा नष्टं प्राप्तवान्। मदवान् महेन्द्रः दुर्वासोमुनिं धिक्कृतवान् तेनैव कारणेन सामृतं सकल स्वर्गैश्वर्यं समुद्रे पतितमभूत्। नत्कीरपण्डितः मदेनैव शिवधिक्कारं कृत्वा कुष्ठव्याधिना पीडीतो बभूव।

मत्सरो नाम असूया। गुणेषु दोषारोप असूया। असूयां विना दुर्योधनस्य प्रतिनायकत्वमेव न विद्यते। भीमसेनस्य अतिमात्रबलं दृष्ट्वा ईर्ष्या सञ्जाता सुयोधनस्य तथैवार्जुन धनुर्विद्या कौशलं च। धृतराष्ट्रस्यापि पाण्डुपुत्राणां विषये अस्त्येव असूया। **भगवद्गीतारम्भश्लोकः पश्यताम्।**

**धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः।**
**मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय!॥**

इति सञ्जयं पप्रच्छ धृतराष्ट्रः मामकाः मम पुत्राः किमकुर्वत? पाण्डवाश्चैव। पाण्डुराज तनयाश्च किमकुर्वत। मम भ्रातुः पुत्रा इति वक्तुमपि मनो न सञ्जातं धृतराष्ट्रस्य। द्वैतभावं प्रदर्शितवान्। पक्षपातभाव पीडितो बभूव। अपजयं प्राप्तवान्। ''सेनयो रुभयोर्मध्ये रथं स्थापय मेऽर्जुन' इत्युक्तवा सर्वान् दृष्ट्वा एते सर्वे मामकाः तान् संहर्तुं मे मनः नोत्सुकं भवति इत्युक्त्वा धनुस्त्यागं कृतवानर्जुनः सर्वे मामकाः इत्यनेन भावेन अर्जुनः विजयं प्राप्तवान्।

यस्य मत्सरो वर्तते तस्य अपजयो जायते। यो मत्सरविदूरः स एव विजेता भवति सर्वदा सर्वथा च इति ज्ञायते अनेन सन्निवेशेन। एवं यो जन अरिषड्वर्ग विदूरो भवति स एव अजातशतृरिति कथ्यते। अजातशत्रोरेव हि विजयो यत्र कुत्रापि वा यदा कदापिवेति निश्चप्रचम्।

अधिकप्रवाहेण, जलसान्द्रतकारणेन भूमिः अधः गच्छति। एतादृशवातवरणार्थं निरीक्षितः राक्षसः हिरण्याक्षः उत्साहेन भूमिं रसातलं नीतवान्। भूमिः राक्षसकरग्रस्ता जाता। एतादृशेन अधिकः समयः गतः। चतुर्मुखस्य रात्रिः गतः। ब्रह्मा उत्थाय सृष्टिकार्यं प्रारम्भं कर्तुम् उद्युक्तः जातः। एतत् सर्वं दृष्टः विष्णुः सर्वलोकसंक्षेमार्थं श्वेतवराहरूपः जातः। तादृशरुपेणैव रसातलं गतवान्। रसातले अधः स्थितं भूमिम् उपरि आनेतुं प्रयत्नं कृतवान्, तथा हिरण्याक्षः तं नियन्त्रितवान्। उभयोर्मध्ये घोरं युद्धं प्रचलितम्। अन्ते श्वेतवराहरूपधारी विष्णुः स्व दंष्ट्राभ्यां हिरण्याक्षस्य शिरः भग्नं कृतवान्। भयङ्कररूपेण प्रचलिते युद्धे प्रवाहित रक्तधारैः सः प्रदेशः रक्तवर्णमभूत्। एतत् परिणामं दृष्ट्वा देवताः सर्वे भीताः अभवन्। तथापि किञ्चित्कालानन्तरं योगदृष्ट्या रसातले प्रचलितं परिणामं ज्ञात्वा शान्तचित्ताः अभवन्। प्रकृतेः शासकः लोककण्टकः मरणं प्राप्तः इति सन्तोषं व्यक्तीकृत्य श्वेतवराहधारिं सहस्रधा स्तोत्रं कृतवन्तः। तथा पुष्पवर्षाणि वर्षिताः। मङ्गलध्वनिः आगतः। एतादृश विपत्तयः पुनरावृतं मास्तु इति धिया ''हे स्वामिन्! सर्वलोककण्टकं राक्षसं मारितवन्तः तथापि अस्माकम् एकं वाक्यम् अस्मिन् प्रदेशे एव भवन्तः अर्चावतारमूर्तिमत्वेन भक्तान् रक्षतु इति अस्माकं वाञ्छा, तथैव भूलोकवासिनां सुखनिवासम् इति उक्तः। तथा भक्तवत्सलः स्वामी तेषां वाञ्छां क्षमितवान्। पश्चात् सः भूमिं स्थिरं कर्तुं तत् प्रदेशं समं कृतवान्। अनन्तरं सर्वे देवाः निःश्वासं प्राप्य स्वस्व स्थानं गतवन्तः।

श्वेतवराहमूर्तिः स्व आज्ञार्थं प्रतीक्षां कृतं गरुडं दृष्टवान्। ''खगेन्द्र! भूतलम् अधः गतं, तं यथास्थितिं

- डा।। सि.शिवारेड्डि
चरवाणी - ९४४०८५९८७२



आनेतुं, राक्षसानां निर्मूलनार्थम् अहं घोराकारं धृतवान्। सर्वाङ्गसुन्दराकारेण मां दृष्ट्वा सा श्रीदेवी इदानीं पश्यति चेत् न हसति वा? तथैव रसातलात् उद्धरिता रमणी भूदेवी मम धैर्यसाहसान् दृष्ट्वा कामिता अभूत्, अहमपि तां वसुन्धरां कामितवान्। आवां द्वावपि परस्परम् अन्योन्यानुरक्तौ स्वः। एतादृश समये तां भामिनीं त्यक्त्वा कथम् आगच्छामि? पक्षिराज! मनसि किमपि न निगूह्य वक्ष्यामि। तेजप्रकाशमाना दर्शनीया, कनकलक्ष्मीः मम कठिनं शरीरं, शरीरे सर्वत्र रोमाभिः असह्यं भवति। भयङ्करैः दंष्ट्राभिः विकृता मां पश्यति चेत् सा भयकम्पिता भवति किल? एतादृश जुगुप्साकररूपेण वैकुण्ठं कथम् आगच्छामि।

मम क्रूररूपं दृष्ट्वा भवान् कः इति पृच्छति चेत् अहं भवत्याः पतिः इति कथं वदामि? एतैः कारणैः, एतैः सन्देहैः इदानीं वैकुण्ठगमनं न समीचीनं, प्रस्तुतं मम रूपं वाञ्छितायाः वनितया सहैव भवामीति मन्ये, किं वदति भवान् ''इति उक्तः तदा'' स्वामिन् मातुः विषये भवन्तः एतादृशं वदन्ति, चित्रं, भूलोकवासिनां हितार्थं भवन्तः श्वेतवराहरूपं धृतवन्तः इति, राक्षससंहारं कृत्वा स्थावरजङ्गमान् रक्षितवन्तः इति भवन्तः लोकोत्तरकार्याणि दृष्ट्वा आदिलक्ष्मी सन्तोषं प्राप्नोति। परवशा भवति। परन्तु भिन्नरूपेण कल्पयितुं मम चित्रं भवति। किमर्थं संशयेन किमपि किमपि कल्पयसि? अधिकभाषणं करोमि चेत् क्षम्यताम् स्वामिन् अम्बा अनापयिनी, खलु, त्वां त्यक्त्वा स्थातुं न शक्नोति, सदा वक्षस्थलवासिनी माता भवन्तः सूकराकारं दृष्ट्वा भयकम्पिता भवति इति न भावयामि। भवान् सर्वज्ञः, भवान् यत् यत् इच्छसि तदेव कुरु'' इति सः हस्तौ संयोज्य अवदत्।

''पुण्यात्मा यत्किमपि वा भवतु। अहं एतादृश वेषधारणेन वैकुण्ठं न आगमिष्यामि। किञ्चित्कालं भूतले निवसितुम् इच्छामि। केवलं हिरण्याक्षसंहारेण दुष्टशिक्षण सपूर्णं न अभवत्। इतोपि राक्षसाः बहवाः सन्ति। तान् अपि संहरणीयम् भवति। अस्तु भवान् साक्षात् वैकुण्ठं गच्छतु, अत्र व्यवहारं सर्वम् आदिलक्ष्म्याः वदतु। मम क्रीडाचले विहरितुम् इच्छा अस्ति। अतः वैकुण्ठतः क्रीडाचलं भूतलम् आनयतु।'' इति उक्तवान् तथा पक्षैः प्रसार्य गरुत्मन्तः वैकुण्ठं जगाम।

गरुत्मन्तः वायुवेगेन वैकुण्ठं गतवान् तथा हरिः ''अहं कुत्र स्यास्यामि'' इति संशयितवान्। अन्ते गौतमीनद्याः दक्षिणपार्श्वे ६० योजनानां दूरे पूर्व समुद्रतटस्य पश्चिमे पञ्च योजनानां दूरे सुवर्ण मुखरी नदेः उत्तरपार्श्वे स्थितः प्रदेशः स्वस्य वास योग्यः इति मत्वा तत्रैव स्थित्वा गरुत्मन्ताय प्रतीक्ष्यमाणः अस्ति।

(अनुवर्तिष्यते)



## मार्च २०२३
### लघुप्रश्नोत्तरी समाधानानि

१. देवकः
२. इन्द्रद्युम्नः
३. देवकी
४. ऊर्मिळा
५. सुग्रीवः
६. सनातन धर्मः
७. ब्रह्मा
८. मुण्डकोपनिषद्
९. सरस्वती
१०. देवव्रतम् / भीष्मम्
११. जय
१२.राधेयः
१३. शन्तनः
१४. परशुरामः
१५. सत्यवती



# आद्यकृषकः पृथुवैन्यः

- विष्णु शर्मा

ऋग्वेदात् एषा कथा उद्धृता (ऋ.१०.९६.२४)। वेनभूपतेः पुत्रः वैन्यः एव पृथुवैन्यः इति नाम्ना ज्ञातः। सः प्रजाहितदक्षः आदर्शः सम्राट् इति स्मृतः। भारतदेशे पृथुना एव कृषिकार्यं प्रारब्धं, संशोधितं, विकासं प्रति नीतं च। स एव कृषिविद्यायाः जनकः इति मतः। अत एव सः प्रथमः कृषकः। धरित्र्याः 'पृथिवी' इति नामाभिधानं पृथोः कार्यस्य स्मारकम्' इति मन्यते बुधैः।

भूपालः पृथुवैन्यः नाम धरायां प्रथमः अभिषिक्तः सम्राट्। प्रयागक्षेत्रे पृथुनृपस्य राजधानी आसीत्। राज्याभिषेकसमये चारणाः पृथुनृपस्य स्तुतिं गातुमुत्सुकाः। तदा पृथुः आज्ञापयत्, ''तिष्ठन्तु चारणाः! यावत् मम सद्गुणाः न प्रकटीभवन्ति तावदहं न स्तोतव्यः। स्तवनं तु ईश्वरस्यैव भवेत्।'' स्तुतिगायकाः पृथुनृपस्य एतादृशीं निःस्पृहतां ज्ञात्वा प्रसन्नाः अभवन्।

एकदा पृथुराजः स्वराज्ये भ्रमणम् अकरोत्। भ्रमणसमये तेन दृष्टं यत् प्रजाः अतीव कृशाः अशक्ताश्च। ताः प्रजाः पशुवज्जीवन्ति। निकृष्टान्नं खादन्ति। तद् दृष्ट्वा राजा चिन्ताकुलः जातः। तदा पुरोहितोऽवदत्, ''हे राजन्, धनधान्यादि सर्वं वस्तुजातं वस्तुतः वसुन्धरायाः उदर एव वर्तते। तत्प्राप्तुं यतस्व।''तदा पृथुभूपेन तदर्थं धनुः सज्जीकृतम्। तदा भूमिः स्त्रीरूपं धृत्वा तस्य पुरतः प्रकटिता अभवत् अवदत् च, ''हे राजेन्द्र! तव पिता दुःशासकः वेनराजः राजधर्मस्य पालनं नाकरोत्। तदा मया चोरलुण्ठकभयात् धनधान्यपुष्पफलानि मम उदरे निहितानि। त्वं तु प्रजाहितदक्षः नृपः। यदि त्वं प्रयत्नेन कृषिकार्यं करोषि तर्हि अहं प्रसन्ना भविष्यामि। अतः धनुः त्यज। खनित्राणि, हलान्, कुद्दालकान् लवित्राणि च हस्ते गृहीत्वा प्रजाजनैः सह कृषिकार्यं कुरु।''

भूमातुः उपदेशं मनसि निधाय पृथुवैन्यः नदीनां मार्गम् अवरुध्य कृषिकार्यार्थं जलस्य उपयोगम् अकरोत्। वृष्टिजलसञ्चयं कृत्वा जलव्यवस्थापनम् अकरोत्। भूमिम् उर्वरतमां कर्तुं प्रायतत। तदनन्तरं तस्मिन् क्षेत्रे जनाः धान्यबीजानि अवपन्। स नैकेभ्यः वृक्षेभ्यः विविधप्रकारकाणां बीजानां सङ्कलनं चयनं च परिश्रमम् अकरोत्। अनन्तरं बीजानां संस्करणं कृत्वा वपनम् अकरोत्। पर्जन्यानन्तरं बीजेभ्यः अङ्कुराः उद्भूताः धान्यलाभेन सर्वे प्रजाजनाः सन्तुष्टाः च अभवन्। एषः कल्याणकारी नृपः पृथिव्यां प्रशासने अग्रणीः जनसेवाव्रती च अभवत्।

चेनै नगरे 17-03-2023 दिनाङ्के आयोजित
ति.ति.देवस्थानस्य श्री पद्मावतीदेव्याः
आलय महाकुम्भाभिषेक कार्यक्रम दृश्यमालिका।
अस्मिन् कार्यक्रमे ति.ति.दे. पालकमण्डलि
अध्यक्षः श्री वै.वि.सुब्बरेड्डि
दम्पत्यौ, अन्ये अधिकारिणः प्रमुखाः
भक्ताः च भागं गृहीतवन्तः।





















## तिरुपति श्रीगोविन्दराजस्वामिनः ब्रह्मोत्सवः

२०२३, मे २६ तः जून् ०३, पर्यन्तम्

**२६.०५.२०२३ भृगुवासरः**

प्रातः - ध्वजारोहणम्

रात्रौ - महाशेषवाहनम्

**२७.०५.२०२३ मन्दवासरः**

प्रातः - लघुशेषवाहनम्

रात्रौ - हंसवाहनम्

**२८.०५.२०२३ भानुवासरः**

प्रातः - सिंहवाहनम्

रात्रौ - मौक्तिकमण्टपः

**२९.०५.२०२३ इन्दुवासरः**

प्रातः - कल्पवृक्षवाहनम्

रात्रौ - सर्वभूपालवाहनम्

**३०.०५.२०२३ भौमवासरः**

प्रातः - आन्दोलिकायां मोहिन्यवतारः

रात्रौ - गरुडसेवा

**३१.०५.२०२३ सौम्यवासरः**

प्रातः - हनुमद्वाहनम्

रात्रौः - गजवाहनम्

**०१.०६.२०२३ बृहस्पतिवासरः**

प्रातः - सूर्यप्रभवाहनम्

रात्रौ - चन्द्रप्रभवाहनम्

**०२.०६.२०२३ भृगुवासरः**

प्रातः - रथोत्सवः

रात्रौ - अश्ववाहनम्

**०३.०६.२०२३ मन्दवासरः**

प्रातः - चक्रस्नानम्

रात्रौ - ध्वजावरोहणम्



## नागुलापुरम् श्रीवेदवल्ली समेत श्रीवेदनारायणस्वामिनः ब्रह्मोत्सवः

२०२३, मे ४ तः १२ पर्यन्तम्

**०४.०५.२०२३ बृहस्पतिवासरः**

प्रातः - ध्वजारोहणम्

रात्रौ - महाशेषवाहनम्

**०५.०५.२०२३ भृगुवासरः**

प्रातः - लघुशेषवाहनम्

रात्रौ - हंसवाहनम्

**०६.०५.२०२३ मन्दवासरः**

प्रातः - सिंहवाहनम्

रात्रौ - मौक्तिकमण्टपः

**०७.०५.२०२३ भानुवासरः**

प्रातः - कल्पवृक्षवाहनम्

रात्रौ - सर्वभूपालवाहनम्

**०८.०५.२०२३ इन्दुवासरः**

प्रातः - आन्दोलिकायां मोहिन्यवतारः

रात्रौ - गरुडसेवा

**०९.०५.२०२३ भौमवासरः**

प्रातः - हनुमद्वाहनम्

रात्रौः - गजवाहनम्

**१०.०५.२०२३ सौम्यवासरः**

प्रातः - सूर्यप्रभवाहनम्

रात्रौ - चन्द्रप्रभवाहनम्

**११.०५.२०२३ बृहस्पतिवासरः**

प्रातः - रथोत्सवः

रात्रौ - अश्ववाहनम्

**१२.०५.२०२३ भृगुवासरः**

प्रातः - चक्रस्नानम्

रात्रौ - ध्वजावरोहणम्



कार्वेटिनगरम्
श्रीवेणुगोपालस्वामिनः
ब्रह्मोत्सवः
२०२३, मे १३ तः २१ पर्यन्तम्

**१३.०५.२०२३ मन्दवासरः**
प्रातः - ध्वजारोहणम्
रात्रौ - महाशेषवाहनम्

**१४.०५.२०२३ भानुवासरः**
प्रातः - लघुशेषवाहनम्
रात्रौ - हंसवाहनम्

**१५.०५.२०२३ इन्दुवासरः**
प्रातः - सिंहवाहनम्
रात्रौ - मौक्तिकमण्टपः

**१६.०५.२०२३ भौमवासरः**
प्रातः - कल्पवृक्षवाहनम्
रात्रौ - सर्वभूपालवाहनम्

**१७.०५.२०२३ सौम्यवासरः**
प्रातः - आन्दोलिकायां मोहिन्यवतारः
रात्रौ - गरुडसेवा

**१८.०५.२०२३ बृहस्पतिवासरः**
प्रातः - हनुमद्वाहनम्
रात्रौः - गजवाहनम्

**१९.०५.२०२३ भृगुवासरः**
प्रातः - सूर्यप्रभवाहनम्
रात्रौ - चन्द्रप्रभवाहनम्

**२०.०५.२०२३ मन्दवासरः**
प्रातः - रथोत्सवः
रात्रौ - अश्ववाहनम्

**२१.०५.२०२३ भानुवासरः**
प्रातः - चक्रस्नानम्
रात्रौ - ध्वजावरोहणम्




अप्पलायगुण्ट,
हृषीकेश, नारायणवनम्
श्रीस्वामिनः
ब्रह्मोत्सवः
३१.०५.२०२३ तः जून् ०८.०६.२०२३ पर्यन्तम्

**३१.०५.२०२३ सौम्यवासरः**
प्रातः - ध्वजारोहणम्
रात्रौ - महाशेषवाहनम्

**०१.०६.२०२३ बृहस्पतिवासरः**
प्रातः - लघुशेषवाहनम्
रात्रौ - हंसवाहनम्

**०२.०६.२०२३ भृगुवासरः**
प्रातः - सिंहवाहनम्
रात्रौ - मौक्तिकमण्टपः

**०३.०६.२०२३ मन्दवासरः**
प्रातः - कल्पवृक्षवाहनम्
रात्रौ - सर्वभूपालवाहनम्

**०४.०६.२०२३ भानुवासरः**
प्रातः - आन्दोलिकायां मोहिन्यवतारः
रात्रौ - गरुडसेवा

**०५.०६.२०२३ इन्दुवासरः**
प्रातः - हनुमद्वाहनम्
रात्रौः - गजवाहनम्

**०६.०६.२०२३ भौमवासरः**
प्रातः - सूर्यप्रभवाहनम्
रात्रौ - चन्द्रप्रभवाहनम्

**०७.०६.२०२३ सौम्यवासरः**
प्रातः - रथोत्सवः
रात्रौ - अश्ववाहनम्

**०८.०६.२०२३ बृहस्पतिवासरः**
प्रातः - चक्रस्नानम्
रात्रौ - ध्वजावरोहणम्





तिरुमल श्रीस्वामिनः 03-03-2023 तः 07-03-2023 पर्यन्तम् आयोजित प्लवोत्सव कार्यक्रम दृश्याणि। अस्मिन् कार्यक्रमे ति.ति.दे. कार्यनिर्वहणाधिकारी श्री ए.वि.धर्मरिड्डि ऐ.डि.ई.एस्., महोदयः भागं गृहीतवान्।





तिरुमल रङ्गनायकमण्टपे श्री सीतारामलक्ष्मणसहित हनुमतः 30-03-2023 दिनाङ्के वैभवेन आयोजित स्नपन तिरुमञ्जन कार्यक्रमः। अस्मिन् कार्यक्रमे ति.ति.दे. कार्यनिर्वहणाधिकारी श्री ए.वि.धर्मरिड्डि, ऐ.डि.ई.एस्.,दम्पत्यौ भागं गृहीतवन्तौ।



तिरुपति वेदविश्वविद्यालये 31-03-2023 दिनाङ्के आयोजित श्री सुदर्शनहोम कार्यक्रमः। अस्मिन् कार्यक्रमे ति.ति.दे. पालकमण्डलि अध्यक्षः श्री वै.वि.सुब्बारेड्डि दम्पत्यौ भागं गृहीतवन्तौ।



तिरुमल श्रीस्वामिनः दर्शनार्थम् 04-03-2023 दिनाङ्के आगत विशाख शारदापीठाधिपतिः श्री श्री श्री स्वरूपानन्देन्द्रसरस्वतीस्वामी, उत्तराधिकारी श्री श्री श्री स्वात्मानन्देन्द्रस्वामी महोदयाः ति.ति.दे. कार्यनिर्वहणाधिकारी श्री ए.वि.धर्मरिड्डि ऐ.डि.ई.एस्., वर्यः स्वागतसत्कारान् दत्तवान्।





तिरुपति, महती कळामन्दिरे ति.ति.दे. आध्वर्ये 08-03-2023 दिनाङ्के आयोजित महिळादिनोत्सवकार्यक्रम दृश्याणि। अस्मिन् कार्यक्रमे ति.ति.दे. सम्युक्तकार्यनिर्वहणाधिकारिणी श्रीमती सदा भार्गवी, ऐ.ए.एस्., श्री शक्ति पीठस्य पीठाधीश्वरी श्रीमाता दयानन्दभारतीस्वामिनी अपि च अन्ये प्रमुखाः भागं गृहीतवन्तः।

# श्रीशेषाद्रीशस्तुतिः

- कर्ता. डा.महामहोपाध्याय
एस्.एन्.सि.रघुनाथाचार्यः

व्याख्याता - कन्दाल लक्ष्मीनारायणः
चरवाणी - ९९८५२३७३५३

(तदनन्तरम्)

## त्वांस्तुवन्तोभक्ताः त्वत्कृपां लभन्ते

श्लो३. श्रीशेषाद्रौ नित्यवासैकधन्याः

भक्ताः प्रापुस्त्वद्दयां त्वां स्तुवानाः।
स्तुत्वा लिप्सुः पद्यबन्धैः कृपांते
दूरे तिष्ठन्नस्मि नोपेक्षणीयः॥

ता - भगवन् वेङ्कटाचलदिव्यक्षेत्रे नित्यनिवासं कुर्वाणा भक्ता अतीव धन्याः। ते चानुदिनं भवतो महिमानं कीर्तयन्तः त्वद्दयायाः पात्राणि आसन्। अहं तु शेषाद्रेः सुदूरे वरङ्गल्नगरे वसामि। अतो भवतस्सन्निधौ नित्यनिवास भाग्यं नानुभवामि। अतश्च तादृशो धन्यो न संवृत्तः। तथापि पद्यबन्धैः त्वां प्रस्तुत्य त्वद्दयां प्राप्तुम् अभिलषामि। अहं दूरदेशस्थ इति, तत्कारणेण मयि औदासीन्यं मा करोः। मां दयस्व इति भावः।

सु.सौ.व्याख्या - तिरुमलैक्षेत्रात् दूरदेशस्थेऽपि स्तुतिकृति स्वस्मिन् श्रीवेङ्कटेशप्रभोः सत्कृपा प्रार्थ्यतेऽस्मिन् श्लोके।





**श्रीशेषाद्रौ** - श्रीनिवास वसतेः वेङ्कटाचलस्य शेषाद्रिरिति प्रख्यातं नाम। गिरेस्तस्य वैभवसूचकानि विंशत्यधिकानि नामानि पुराणेषु प्रसिद्धानि। यथा ब्रह्माण्डपुराणे श्रीवेङ्कटाचलमाहात्म्ये -

अञ्जनाद्रि वृषाद्रिश्च शेषाद्रि गरुडाचलः।
तीर्थाद्रि श्रीनिवासाद्रि श्चिन्तामणि गिरिस्तथा।।
वृषभाद्रि र्वराहाद्रि र्ज्ञानाद्रिः कनकाचलः।
आनन्दाद्रिश्च नीलाद्रि स्सुमेरु शिखराचलः।।
वैकुण्ठाद्रिः पुष्कराद्रिरिति नामानि विंशतिः।।''

- तीर्थखण्ड १-२१,२२,२३

तथा गारुडे पुराणे -

तस्य वेङ्कटशैलस्य सन्ति नामान्यनेकशः।
अञ्जनाद्रि श्शेषगिरि र्वृषाद्रि र्वृषभाचलः।।
नारायणाद्रि स्सिंहाद्रि श्रीशेल स्सिंहभूधरः।

।।६३-१९,२०।।

- इत्येवमादीनि प्रकीर्तितानि। सर्वाण्यपि नामान्येतानि गिरेरस्य बहुविधं वैभवातिशयं प्रकाशयन्ति। तत्र च ''तत्र भूत्वा गिरिवरो भवान् वसतु भूतले'' ब्रह्माण्डं तीर्थ २.४.इति भगवताऽऽदिष्ट श्शेषः भूम्यां पर्वतो भूत्वा शेषाद्रिरिति नाम्ना प्रथितोऽभूत्। तस्य च शिरोदेशः काळहस्तीति विख्यातः। पुच्छभागश्च श्रीशैल इति विश्रुतः। पक्षप्रान्तश्च अहोबिलमिति विदितः। तस्य फणारत्नस्थानीयोऽयं वेङ्कटाचल इति कथ्यते।

**नित्यवासैकधन्याः** - नित्यःवासः नित्यवासः, स चासौ एकश्च नित्यवासैकः। एकशब्दोऽत्र केवलार्थकः। न तु सङ्खयावचनः। विशेषणं विशेष्येणेति समासः। तन्मात्रेण धन्याः भाग्यवन्तः नित्यवासैक धन्याः। धनं लब्धा इत्यर्थे धनशब्दात्'' धनगणं लब्धा'' अष्टा ४.४.८४ इति यत् प्रत्यये धन्य शब्दो व्युत्पन्नः। वेङ्कटाद्रौ नित्यनिवासमात्रेणैव भाग्यवन्तो भवन्तीति भावः। उक्तं च वराहपुराणे -

ये हि चात्र स्थितिं नित्यं वाञ्छन्ति मनुजा भुवि।
तेषा मिहैव दास्यामि सम्पदं सन्ततिं तथा।। इति

-वराह वेङ्कटाचल - ५१.३५

**त्वां स्तुवानाः त्वद्दयां प्रापुः** - भगवतः कल्याणगुणवैभवं सङ्कीर्तयन्तो भक्तजनाः तस्यानुग्रहं प्राप्नुवन्तीत्यर्थः। शेषाद्रेरस्य वैकुण्ठाद्रि रित्यपि नाम।'' वैकुण्ठादागतत्वेन वैकुण्ठाद्रि रिति स्मृतः। वराह १.३७.२६. श्रीवैकुण्ठे यथा नित्यपारिषदा'' तद्विप्रासो विपन्यवो जागृवांसस्समिन्धते'' परमपुरुषं सदा पश्यन्तः तमेव स्तुवन्तश्च तस्यानुग्रहपात्रीभूताः प्रकाशन्ते तथैवात्रापि भूलोक वैकुण्ठे तिरुमलैक्षेत्रे निवसन्तो भक्तास्तमेवानवरतं गोविन्देतिकीर्तयन्तः तस्य कृपायाः पात्रतां प्राप्नुवन्ति।

**दूरे...नोपेक्षणीयः** - भगवन्! तव दयायाः निरतिशयत्वात् निरवधिकत्वाच्च भवन्निवासस्यास्य क्षेत्रस्थ दूरे स्थितमपि, भवन्तमेव स्तुवन्तं मां परया कृपया अनुगृहाण। मत्कृतां स्तुति मिमां स्वीकुरु इति भावः। उक्तं च श्रीवेङ्कटाचलमाहात्म्ये -

स्वगुणोत्कर्षविज्ञानात् यथा प्रीतिर्निजाहरेः।
नतादृशी प्रीतिरस्ति ह्यज्ञाना दन्यया मतौ। आदित्य-१.२१

भगवत श्रीनिवासस्य कल्याणगुणज्ञानात् तस्य प्रीतिर्जायते। अज्ञानात् अन्यथा भावयति जने तस्य प्रीतिर्नभवतीत्यर्थः। तथैव -

भक्त्या स्तोत्रेण सन्तुष्टस्सर्वेष्टानि प्रवर्षति।
भक्ति स्तोत्र विहीनेषु दयावान् न भवेत् तथा। १.२२.२३.

यो जनो भक्त्या देवदेवं प्रस्तौति, तस्मै सर्वेष्टानि प्रददाति। भक्तिरहितेषु दयां न प्रवर्तयतीति भावः।

शालिनी वृत्तमिदम्। शालिन्युक्ता स्तौ तगौ गोऽब्धिलोकैः इति तल्लक्षणम्।।

(अनुवर्तिष्यते)



# महाभारतान्तर्गत - यवक्रीतोपाख्यानम्

- डा. बी.कामाक्षम्मा, चरवाणी - ७२९०८०९७१९

**प्रस्तावना -**

**महाभारतम् -** महाभारतं भारतदेशे सर्वाधिकसम्मानग्रन्थः। रामायण महाभारते भारतीयसंस्कृतेः उपजीव्ये स्तः। महाभारतं न केवलमेको ग्रन्थः अपि तु महासागरः। यस्मिन् भारतस्य संस्कृतिः, सभ्यता, इतिहासः, दर्शनम्, विज्ञानम्, धर्मः सर्वमुपलभ्यते। अत एवोक्तम् -

**यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित्॥**

न केवलं भारते अपि तु विश्वस्मिन् विश्वे महाभारतान्तर्गत उपाख्यानानामादरणम् अस्तीति सर्वविदितविषयः एव।

**यवक्रीतोपाख्यानम् -** एतदुपाख्यानं वनपर्वणि १३५ तः १३८ अध्यायपर्यन्तमस्ति। लोमशः युधिष्ठिरं प्रति वदति - भरद्वाजः रैभ्यः इति द्वौ प्रसिद्धौ मुनी आस्ताम्। द्वावपि सखायौ। तौ एकस्मिन्नेव आश्रमे निवसतः। रैभ्यस्य अर्वावसु-परावसु नामधेयौ द्वौ सुतौ भरद्वाजस्य एक एव पुत्रः यवक्रीतनामधेयः। रैभ्यः तस्य पुत्रौ च विद्वांसः, तपस्विनः, कीर्तिमन्तश्च। भरद्वाजस्तु तपस्सम्पन्नः केवलम्। अत एव सः विप्रैः असत्कृतः भवति स्म। एतदर्थं यवक्रीतः सन्तप्तहृदयस्सन् वेदज्ञानप्राप्तये तपस्तेपे। सः तपोरूपाग्नौ स्वशरीरमुपतापयन् इन्द्रस्य मनसि तापं जनयामास। अतः **इन्द्रः -** यवक्रीतमुपगम्य कस्य हेतोः तपः क्रियतेत्यपृच्छत्। द्विजानां कृते गुरुमुखादध्ययनं विना वेदज्ञानं सहजतया भवत्वित्यभिलाषया अहं तपः करोमि इत्यब्रवीत् यवक्रीतः। तच्छ्रुत्वा इन्द्रः त्वया अमार्गः अनुश्रियते। वेदाः गुरुमखादेव अध्ययनयोग्याः। अतः गच्छ! गुरुमुखादेव अधीहि! इत्युक्त्वा ततः निर्गतः। किन्तु यवक्रीतः महता तपसा देवेन्द्रं भृशं सन्तापयामास। पुनः इन्द्रः - तमुपेत्य ''अशक्यार्थसम्पादनाय तपः क्रियते त्वया। आस्तां तावत्, त्वत्पितुः तव च गुरुमुखादध्ययनं विना वेदाः प्रतिभासन्ताम्'' इति वरमदात्। तेन असन्तृप्तः यवक्रीतः ''ममेप्सितं वरं यदि न ददाति तर्हि महता नियमेन घोरतपः तप्स्ये। जाज्वल्यमान-होमाग्नौ एकैकमङ्गं स्थापयामि'' इत्युक्त्वा घोरतपःकरणाय उद्युक्तः। इन्द्रः तं तपसः निवारयितुम् अनेकशतवर्षवयस्कस्य दुर्बलस्य ब्राह्मणस्य रूपं धृत्वा गङ्गातीरे मुष्टिकापरिमितान् सिकतारेणून् स्वीकृत्य तटे स्थापयति स्म। तदा यवक्रीतः शौचकर्म कर्तुं गङ्गातीरं गतः। तत्र वृद्धं दृष्ट्वा तमुपेत्य किमिदम्? किं

चिकीर्षति? किमभिलषति? इत्यपृच्छत्। तदा वृद्धरूपधारी इन्द्रः जनानां सौकर्याय वालुकागृहनिर्माणाय यतमानोस्मीत्यब्रवीत्। तदा यवक्रीतः एतदसम्भवम्। अतः अशक्यात् कार्यात् निवर्तस्व। शक्यं किमपि समाचरेत्यवोचत्। तदा इन्द्रः सत्यमेव। एतदसम्भवम्। तद्वदेव गुरुमुखादध्ययनं विना वेदज्ञानप्राप्तिरपि असम्भवा एव। असम्भवात् कार्यादहं विरमामि। त्वमपि विरतो भव। त्वत्पिता, त्वं च ईप्सितं वेदज्ञानम् अनायासेन प्राप्नुतः। इतोपि यत्किमपि कांक्षितं चेत् तदपि सिद्ध्यति इति वरं प्रदाय इन्द्रः देवलोकं गतः।

अत्यन्तं सन्तुष्टः यवक्रीतः पितरमुपेत्य वरप्राप्तिवृत्तान्तं श्रावयामास। तदा पिता भरवद्वाजः - हे वत्स! एतद्वरं त्वयि अहङ्कारं जनयति। अहङ्कारी क्षिप्रमेव विनङ्क्ष्यति।

**दर्पस्ते भविता तात वराल्लब्ध्वा यथोचितम्।**
**स दर्पपूर्णः कृपणः क्षिप्रमेव विनङ्क्ष्यति।।**
**।।वनपर्व.१३५/४४।।**

अतः सन्दर्भेस्मिन् देवैः प्रोक्तां इमां प्राचीनकथां श्रुणु इति इत्थं श्रावयामास -

पुरा बालधिः नाम सुप्रसिद्धः, शक्तिशाली मुनिरासीत्। अनपत्यः सः देवोपमपुत्रप्राप्तये कठोरतपः चकार। तस्य तपसा सन्तुष्टाः देवाः देवतुल्यपुत्रं अददुः किन्तु देवानामिव आयुः तु न अयच्छन्। मुनिः पुत्रस्य आयुर्विषये अत्यन्तं उद्विग्नस्सन् दुष्करं तपः कृतवान्। तस्य तपसा सन्तुष्टाः देवाः मरणधर्मा मानवः देवतासदृशम् अमरत्वं प्राप्तुं न शक्नोति। अतः तव पुत्रस्य मरणं निमित्ताधीनं भवति इत्यवोचन्।

**तस्य प्रसादो वै देवैः कृतो न त्वमरैः समः ।**
**नामर्त्यो विद्यते मर्त्यो निमित्तायुर्भविष्यति।।**
**वनपर्व १३५/४७।।**

तदा बालधिः देवानुद्दिश्य - यावत् एते पर्वताः भूतले स्थास्यन्ति तावत् मम सुतस्य आयुः भवतु इति वरमपृच्छत्।

**यथेमे पर्वताः शश्वत् तिष्ठन्ति सुरसत्तमाः।**
**अक्षयास्तन्निमित्तं मे सुतस्यायुर्भविष्यति।।**
**वनपर्व.१३५/४८।।**

ईप्सितं वरं प्रदाय देवाः निर्गता तदनन्तरं बालधेः पुत्रप्राप्तिर्जाता। सः बालः अत्यन्तं मेधोयुक्तः अतः सः मेधावी इति नाम्ना प्राख्यातः। सः बालधिः यावत् गिरयः स्थास्यन्ति तावत् मम मरणं नास्तीति ज्ञात्वा अत्यन्तं गर्वान्वितस्सन् ऋषीन् अवमन्यते स्म। अपि च सः ऋषीन् पीडयितुमेव पृथिव्यां चतुसृषु दिक्षु विचरति स्म। एकदा धनुषाक्षस्य समीपमगच्छत्। सः अत्यन्तं शक्तिशाली, मनीषी च आसीत्। तं पीडयितुमुद्युक्तः अयम्। तपस्सम्पन्नः ऋषिः धनुषाक्षः त्वं भस्म भवेति शप्तवान्। किन्तु देवानां वरप्रसादेन सः भस्म नाभूत्। तदा धनुषाक्षः शापस्य असफलतायाः निमित्तं ज्ञात्वा महिषैः पर्वतान् विदीरयामास। निमित्ते विनष्टे सति मुनिकुमारः मेधावी यमपुरीं गतः। मृतं पुत्रमुपेत्य पिता बालधिः अन्यन्तं विललाप। देवाः विलपन्तं मुनिं उपेत्य मर्त्यः (मरणधर्मा) मनुष्यः कथञ्चिदपि दैवविधानस्योल्लङ्घनं कर्तुं न शक्यः। अत एव धनुषाक्षः बालकस्य आयुर्निमित्तभूतान् तत्रत्यपर्वतान् महिषैः भेदयामास।

**न दिष्टमर्त्यमत्येतुमीशो मर्त्यः कथञ्चन।**
**महिषैर्भेदयामास धनुषाक्षो महीधरान्।।**
**।।वनपर्व. १३५/५५।।**

एवं रूपेण तपस्विनः बालाः अभीष्टवरान् प्राप्य अहङ्कारिणः भूत्वा विनश्यन्ति। अतः त्वं तथा मा भव।

**एवं लब्ध्वा वरान् बाला दर्पपूर्णास्तपस्विनः।**
**क्षिप्रमेव विनश्यन्ति यथा न स्यात् तथा भवान्।।**
**।।वनपर्व. १३५/५६।।**

अतः हे वत्स! रैभ्यः अत्यन्तं शक्तिशाली, तपस्वी, महर्षिः अत्यन्तं क्रोधी च। तस्य पुत्रावपि वीर्यवन्तौ। अतः तेषां समीपं कदापि मा गच्छ। सर्वदा जागरूको भव। प्रयत्नशीलश्च भव। इत्यब्रवीत्। एतदाकर्ण्य यवक्रीतः एवमेव करिष्ये, मनसि सन्तापं मा कुरु। यथा भवान् मत्कृते मान्यः तथा त्वत्सखः रैभ्योपि मत्कृते मान्यः इत्यादिभिः मधुरवचनैः पितरं सन्तोषयामास। किन्तु सः अकुतोभयस्सन् ऋषीन् पीडयन् मोदं सन्तुष्टिं च प्राप्नोति स्म।

चित्रकथा

# कूर्मावतारः

तेलुगुमूलम् - श्री डी.श्रीनिवास दीक्षितुलु
चित्राणि - श्री के.तुलसीप्रसाद
संस्कृतानुवादः - का. भास्करः
चरवाणी - ८१४३१५०८३३

दूर्वास महर्षेः शापात् देवाः दुर्बलाः अभवन्। देवाः प्रायः राक्षसैः पराजिताः भवन्ति स्म।ततः देवाः विष्णुं प्रार्थितवन्तः.....




देवाः राक्षसैः सह....

मन्दरगिरिम् आनीतवन्तः।




नागराजं वासुकिम् आनयन्ति

मथनम् आरब्धवन्तः।




तावत्.. मन्दरगिरिः
समुद्रे स्खलितः।
अरे मन्थनदण्डं
विना कथं
मथनम्?
श्रीहरे!
रक्षतु.....
रक्षतु।
श्रीहरिः प्रादुर्भूतः। सः
रक्षणं दत्तवान्।
श्रीहरिः कूर्मरूपं धृत्वा तस्य पृष्ठे मन्दरं वहन् स्थितः।
पुनः मथनम् आरब्धम् अस्ति।
बाधकं गतम्।
आरभामहे
आदिकूर्माय प्रणामं कृत्वा देवाः दानवाः च....
नमस्ते श्रीकूर्मनारायण!
स्वस्ति

# बालविनोदिनी

अस्य चित्रपटस्य रञ्जनं कुर्मः वा?

प्रदत्तं चित्रपटम् अधोनिर्दिष्टप्रदेशे स्थापयामो वा?



## रसप्रश्नाः

१. गुप्तगामिनी नदी का?

२. तक्षशिला नगरम्  इदानीं कुत्र अस्ति?

३. सचित्रा बालानां मासिकी संस्कृत पत्रिका का?

४.इदानीं मिथिला नगरं कुत्र अस्ति?

५.युगानि कति?

६. कल्पाः कति?

(समाधानानि - १. सरस्वती २. पाकिस्थाने ३. संस्कृत चन्दमामा ४. बिहार प्रान्ते ५. चत्वारि ६. सप्त )



भेदाः कुत्र?



(१.पर्वतः २. मयुरः ३. रङ्गवल्ली ४. हारस्य डालर् चिह्नं ५. एकः बालकः ६. उपवनस्य भित्तिः ७.पृष्ठे वस्त्रस्य सीमा)

ऐदंप्राथम्येन सप्तगिरिमासपत्रिकायां लघुप्रश्नोत्तरी इति स्पर्धाकार्यक्रमः आयोजितः
यत्र एतन्मासीयपत्रिकायां प्रकटितविषयाधारिताः प्रश्नाः भवेयुः। अतः हे बालबालिकाः!
प्रतिमासं इमां पत्रिकां पठित्वा उत्तरदानप्रक्रियायां सक्रियं भागं वहन्ति खलु!

१. महाभारतयुद्धे द्वयोः पक्षयोः सैन्यप्रमाणं किम्?
२. महाभारतस्य कस्मिन् पर्वणि भगवद्गीता अस्ति?
३. पञ्चमहाकाव्येषु प्रथमं काव्यं किम्?
४. पञ्चमहाकाव्यानां व्याख्यानकर्ता कः?
५. संस्कृतस्य प्रथमः चम्पूग्रन्थः कः?
६. बृहत्कथा ग्रन्थस्य कर्ता कः?
७. प्रस्थानत्रयं नाम किम्?
८.शिवपञ्चायतनपूजायां के के पूज्यन्ते?
९. पूजायां पञ्च उपचाराः के?
१०. पूर्वं वेदशाखाः (अध्ययनपरम्परापद्धतिः) कति आसन्?
११. भारतीय लिपीनां सर्वासां मूललिपिः का?
१२. अमरकोशस्य प्रथमानुवादः कया भाषया कृतः?
१३. कस्यां तिथौ भारतं स्वतन्त्रम् अभवत्?
१४. जैन पञ्चाङ्गानुगुणं वर्षारम्भः कदा भवति?
१५. इदानीं कः कल्पः प्रचलति?

| समाधानानि |
|---|
| १. |
| २. |
| ३. |
| ४. |
| ५. |
| ६. |
| ७. |
| ८. |
| ९. |
| १०. |
| ११. |
| १२. |
| १३. |
| १४. |
| १५. |

## नियमावालिः

१. केवलं १० तः १५ वर्षीयाः बालाः हैन्दवाः अत्र भागं ग्रहीतुमर्हन्ति।
२. बालाः पत्रिकापुटे प्रदत्तस्थले समानभाषायाम् एव उत्तरं विलिख्य तत्पत्रं The Chief Editor Office, Sapthagiri, T.T.D. Press Compound, K.T.Road, Tirupati 517507, प्रति २५ दिनाङ्कात् पूर्वं प्रेषयेयुः। प्रतिकृतीः (Xerox) नैव स्वीक्रियन्ते।
३. बालानां पितरौ मासपत्रिकाग्रहीतारः (Subsribers) भवेयुः। तत्र नाम, सङ्केतः, दूरवाणीसङ्ख्या च उत्तरपत्रिकायां देया एव।
४. समाधानेषु त्रुटयः, समीकरणानि च न भवेयुः।
५. सर्वेषां प्रश्नानां समीचीनसमाधानं दत्तवन्तां त्रयाणां बालानां चयनं DIP द्वारा क्रियते।
६. विजेतॄणां नामानि अग्रिममासीय सप्तगिरि पत्रिकायां प्रचुरितानि भवन्ति।
७. Chief Editor कार्यालयीयकार्यकर्तृपुत्रपत्रिकाणां च अत्र अवकाशो नास्ति।
८. अस्य कार्यक्रमस्य समाचारः दूरवाणीद्वारा नैव दीयते।

Subscription Number :
Name :
Mother :
Father :
Address :
Phone Number :

Printed by Sri P. Ramaraju, M.A., and Published by Dr. K. Radha Ramana, M.A., M.Phil., Phd., on behalf of Tirumala Tirupati Devasthanams and Printed and Publised at Tirumala Tirupati Devasthanams Press, K.T. Road,Tirupati 517 507.
Editor : Dr.V.G. Chokkalingam, M.A., Ph.D.

**तिरुमल श्री स्वामिनः 22-03-2023 दिनाङ्के आयोजित युगादि आस्थान वैभव कार्यक्रम दृश्यमालिका। अस्मिन् कार्यक्रमे ति.ति.दे. पालकमण्डलि अध्यक्षः श्री वै.वि.सुब्बारेड्डि दम्पत्यौ अपिच ति.ति.दे. कार्यनिर्वहणाधिकारी श्री ए.वि.धर्मारेड्डि ऐ.डि.ई.एस्., दम्पत्यौ भागं गृहीतवन्तः।**






**ओण्टिमिट्ट, श्रीकोदण्डरामस्वामिनः 05-04-2023 दिनाङ्के आयोजित कल्याणोत्सव सन्दर्भे आन्ध्रप्रदेश राज्य पक्षतः स्वामिनः कौशेय वस्त्राणि गौ. श्री पेद्दिरेड्डि रामचन्द्रारेड्डि दम्पत्यौ समर्पितवन्तौ। अस्मिन् कार्यक्रमे ति.ति.दे. पालकमण्डलि अध्यक्षः श्री वै.वि.सुब्बारेड्डि दम्पत्यौ, ति.ति.दे. कार्यनिर्वहणाधिकारी श्री ए.वि.धर्मारेड्डि ऐ.डि.ई.एस्.दम्पत्यौ ति.ति.दे. अधिकारिणः, प्रमुखाः च भागं गृहीतवन्तः।**









SAPTHAGIRI (SANSKRIT) SPIRITUAL ILLUSTRATED MONTHLY  PUBLISHED BY TIRUMALA TIRUPATI DEVASTHANAMS
PRINTING ON 25-04-2023 & posting at Tirupati RMS Regd.with the Registrar of Newspapers for
India under RNI No.21138/1970 Postal Regd.  No. TRP/154/2021-2023"
LICENCED TO POST WITHOUT PREPAYMENT No.PMGK/RNP/WPP-04(4)/2021-2023"
Posting on 5th of every month.

